# Shivabhaktena Dvijaprati Shivarchanopadesham

# શિવભક્તેન દ્વિજપ્રતિ શિવાર્ચનોપદેશમ્

## Document Information

Text title : Shivabhaktena Dvijaprati Shivarchanopadesham

File name : shivabhaktenadvijapratishivArchanopadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 20| 156-166||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 16, 2024

*sanskritdocuments.org*

# શિવભક્તેન દ્વિજપ્રતિ શિવાર્ચનોપદેશમ્

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
શિવભક્તઃ ઉવાચ
(અતઃ) શિવૈકશરણો ભવ ત્વ દ્વિજસત્તમ ।
શિવૈકશરણાનાં તુ નાસ્ત્યેવ યમયાતના ॥ ૧૫૬॥

બિભેતિ શાઙ્કરં દૃષ્ટ્વા યમોઽપિ સતતં દ્વિજ ।
અતો ભજ મહાદેવં ભક્ત્યા ભસ્મવિભૂષિતઃ ॥ ૧૫૭॥

સમર્ચય મહાદેવં રુદ્રાક્ષાભરણોજ્જ્વલઃ ।
જાબાલોક્તવિધાનેન ત્રિપુણ્ડ્રં કુરુ સાદરમ્ ॥ ૧૫૮॥

શિવાર્ચનં યથા નિત્યં ભસ્મરુદ્રાક્ષધારણમ્ ।
કર્તવ્યં શ્રદ્ધયા નિત્યમપ્રમાદેન સર્વથા ॥ ૧૫૯॥

નિધનેત્યાદિ યે મન્ત્રા નમોઽન્તાઃ પાપનાશકાઃ ।
તૈરન્વહં પૂજનીયો લિઙ્ગરૂપી સદાશિવઃ ॥ ૧૬૦॥

નિત્યમાર્દ્રૈરનાર્દ્રૈર્વા બિલ્વપત્રૈર્મહેશ્વરમ્ ।
પૂજય ત્વં ત્રિકાલં ચ ભક્તિશ્રદ્ધાપુરઃસરમ્ ॥ ૧૬૧॥

બિલ્વપત્રાણિ શુદ્ધાનિ સ્વતઃ પર્યુષિતાન્યપિ ।
શઙ્કરાર્પણયોગ્યાનિ ભવન્તિ દ્વિજસત્તમ ॥ ૧૬૨॥

સુવર્ણબિલ્વપત્રં ચ રત્નં ચ રજતં તથા ।
ન હિ પર્યુષિતં વિપ્ર શુદ્ધમેવ સ્વયં યતઃ ॥ ૧૬૩॥

અર્ચિતાન્યપિ બિલ્વાનિ પ્રક્ષાલ્ય ચ પુનઃ પુનઃ ।
શઙ્કરાર્પણયોગ્યાનિ નૂતનાનીવ સર્વદા ॥ ૧૬૪॥

શુષ્કં ત્રુટિતમાર્દ્રં વા બિલ્વપત્રં શિવપ્રિયમ્ ।
તસ્માદર્ચય યત્નેન બિલ્વપત્રૈઃ સદાશિવમ્ ॥ ૧૬૫॥

મહાપાપવિનિર્મુક્તો ભવિષ્યસિ ન સંશયઃ ॥ ૧૬૬॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવભક્તેન દ્વિજપ્રતિ શિવાર્ચનોપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૦। ૧૫૬-૧૬૬॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 20 . 156-166..

Notes:
A Śivabhakta શિવભક્ત gives Upadeśa ઉપદેશ to a Divja દ્વિજ about merits of worshiping Śiva શિવ.

Proofread by Ruma Dewan

---

*Shivabhaktena Dvijaprati Shivarchanopadesham*

pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*